Roll No. : ........................................

Total No. of Questions : **12** ] [ Total No. of Printed Pages : **4**

# SLA–223

## B.A. Part–III Due of B.A. Part–II (Supplementary) Examination, 2022

## SANSKRIT

Paper - II

## (वैदिक साहित्य, गद्य साहित्य एवं व्याकरण)

*Time : 1½ Hours* ] [ *Maximum Marks : **100***

**खण्ड–अ** **(अंक : 2 × 10 = 20)**

**नोट** :– सभी **दस** प्रश्नों के उत्तर दीजिए (उत्तर-सीमा **50** शब्द)। प्रत्येक प्रश्न **2** अंक का है।

**खण्ड–ब** **(अंक : 8 × 5 = 40)**

**नोट** :– सात में से किन्हीं **पाँच** प्रश्नों के उत्तर दीजिए (उत्तर-सीमा **200** शब्द)। प्रत्येक प्रश्न **8** अंक का है।

**खण्ड–स** **(अंक : 20 × 2 = 40)**

**नोट** :– चार में से किन्हीं **दो** प्रश्नों के उत्तर दीजिए (उत्तर-सीमा **500** शब्द)। प्रत्येक प्रश्न **20** अंक का है।

**खण्ड–अ**

1. सर्वे प्रश्नाः अनिवार्याः सन्ति। केषाञ्चित् **पञ्चानां** प्रश्नानां उत्तराणि संस्कृत भाषायां देयानि–

   (i) विष्णु सूक्तस्य ऋषि देवता छन्दश्च लेखनीयः।

   (ii) स जनासः सः इन्द्रः कस्मिन् सूक्ते वर्णितः ?

   (iii) ईशावास्योपनिषदे कति मन्त्रा सन्ति ?

(iv) मा गृधः कस्यस्विद् धनम् कस्मिन् उपनिषदे वर्णितः ?

(v) चन्द्रापीड कस्य पुत्रः आसीत् ?

(vi) कादम्बरी कस्या रचना ?

(vii) मैं पुस्तक पढ़ता हूँ। संस्कृतमनुवादो विधेयः।

(viii) समासस्य कति प्रकाराः नामानि लेखनीयः ?

(ix) येनाङ्गविकारः सूत्रस्यार्थः लेख्य।

(x) नमः योगे का विभक्ति ?

**खण्ड–ब**

**नोट** :– सप्त प्रश्नेषु केषाञ्चित् **पञ्चानां** प्रश्ननानामुत्तराणि देयानि। उत्तर सीमा शतद्वयं (**200**) शब्देषु भवितव्यः।

2. कयोश्चिद् **द्वयो**र्मन्त्रयोरनुवादो करणीयः–

(क) स नः पितेव सूनवे अग्ने सूपायनो भव।
सचस्व नः स्वस्तये॥

(ख) यस्य त्री पूर्णा मधुना पदान्यक्षीयमाणा स्वधया मदन्ति।
य उ त्रिधातु पृथिवी मुतद्याम् एकोदाधार भुवनानि विश्वा॥

(ग) संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्।
देवा भागं यथा पूर्वे सं जानानामुपासते॥

3. कयोश्चिद् **द्वयो**र्मन्त्रयोः व्याख्या कार्या–

(क) ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।
तेन व्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद् धनम्॥

(ख) विद्यां चाविद्यां च यस्तद् वेदोभयं सह।
अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते॥

(ग) वायुरनिलममृतमभेदं भस्मान्तं शरीरम्।
ओइम् (ओम्) क्रतो स्मर कृतं स्मर क्रतो स्मर कृतं स्मर॥

4. कयोः **द्वयोः** गद्यांशयोः आर्यभाषायां (हिन्द्याम्) अनुवादो विधेय–

(क) यौवनारम्भे च प्रायः शास्त्रजल प्रक्षालन निर्मलापि कालुष्यमुपयाति बुद्धिः। अनुज्झित धवलतापि सरागैव भवति यूनां दृष्टिः। अपहरति च वात्येव शुष्कपत्रं समुद्भूत रजोभ्रान्तिरति दूरमात्मेच्छया यौवनसमये पुरुषं प्रकृतिः। इन्द्रियहरिण हारिणी च सततदुरन्ता इयमुपभोगमृगतृष्णिका।

(ख) न परिचयं रक्षति। नाभिजनमीक्षते। न रूपमालोकयते। न कुलक्रममनुवर्तते। न शीलं पश्यति। न वैदग्ध्यं गणयति। न श्रुतमाकर्णयति। न धर्ममनुरुध्यते। न त्यागमाद्रियते। न विशेषज्ञतां विचारयति। नाचारं पालयति। सत्यमवबुध्यते। न लक्षणं प्रमाणी करोति। गंधर्वनगर लेखेव पश्यत एव नश्यति।

(ग) इदमेव च पुनः पुनरभिधीयसे। विद्वांसमपि, सचेतनमपि, महासत्वमप्यभिजातमपि धीरमपि प्रयत्नवन्तमपि पुरुषमियं दुर्विनीता खलीकरोति लक्ष्मीरिति। सर्वथा कल्याणैः पित्रा क्रियमाणमनु भवतु भवान् नवयौवराज्याभिषेकमंगलम्, कुलक्रमागतामुद्वह पूर्व पुरुषैरूढ़ां धुरम्, अवनमय द्विषतां शिरांसि, उन्नमय बन्धुवर्गम् अभिषेकानन्तरं च प्रारब्धदिग्विजयः परिभ्रमन् विजितामपि तव पित्रा सप्तद्वीपभूषणां पुनर्विजयस्व वसुन्धराम्।

5. शुकनासोपदेशस्य सारं लेखनीयः।

6. (क) अधोलिखितेषु **चतुर्णां** वाक्यानां वाच्यपरिवर्तनम् करणीयम्—

(i) अहं ग्रामं गच्छामि।

(ii) सः पत्रं लिखति।

(iii) रामः पुस्तकं पठति।

(iv) रमा गृहं गच्छति।

(v) मया पत्रं लिख्यते।

(vi) ते विद्यालयं पठन्ति।

(ख) बहुव्रीहि समासस्य परिभाषा, भेदाः लेखनीयः।

7. अधोलिखितेषु पदेषु विभक्तेः कारणं सूत्रोल्लेखपूर्वकं क्रियताम्—

(क) गां दोग्धि पयः।

(ख) ग्रामं परितः वृक्षाः सन्ति।

(ग) सः अक्ष्णा काणः अस्ति।

(घ) गुरवे नमः।

(ङ) वृक्षात् पत्राणि पतन्ति।

(च) कविषु/कवीनां कालिदासः श्रेष्ठः अस्ति।

8. निम्नांकितेषु केषाञ्चित् **चतुर्णां** समस्त पदानां विग्रहं कुरुत समासस्य नाम लिखतु—

(क) यथाशक्ति

(ख) निर्मक्षिकम्

(ग) पञ्चगङ्गम्

(घ) ग्राम गतः

(ङ) अक्ष्णा काणः

(च) यूपदारु

(छ) राजपुरुषः

(ज) पीतम्बरो हरिः

(झ) मातापितरौ

**खण्ड–स**

**नोट** :– अधोलिखितेषु चतुर्षु प्रश्नेषु कयोः **द्वयोः** प्रश्नः करणीयः। उत्तरसीमा पञ्चशतशब्देषु (**500**) भवितव्यम्।

9. अग्नि, इन्द्र सूक्तस्य **अथवा** संज्ञान सूक्तस्य, प्रजापति सूक्तस्य हिन्द्याम् सारो लेख्यः।

10. शुकनासोपदेशानुसारेण लक्ष्म्याः स्वरूपं प्रतिपाद्यताम्।

11. अधोलिखितेषु **पञ्चानां** सूत्राणां सोदाहरणं व्याख्या कार्याः–

(क) नदीभिश्च।

(ख) सहसुपा।

(ग) चतुर्थी।

(घ) तत्पुरुषः समानाधिकरणः कर्मधारयः।

(ङ) विशेषणं विशेष्येण बहुलम्।

(च) अनेकमन्य पदार्थे।

(छ) चार्थे द्वन्द्वः।

12. निम्नलिखितेषु सूत्रेषु **पञ्चानां** सूत्राणां सोदाहरणं व्याख्या कार्याः–

(क) कर्मणिद्वितीया।

(ख) अधिशीङ्स्थाऽऽसां कर्म।

(ग) कर्तृकरणयोस्तृतीया।

(घ) इत्थं भूत लक्षणे।

(ङ) चतुर्थी सम्प्रदाने।

(च) ध्रुवमपायेऽपादानम्।

(छ) षष्ठी शेषे।

(ज) आधारोऽधिकरणम्।

(झ) यतश्च निर्धारणम्।